मृगराजः, पुं, (मृगाणां पशूनां राजा अधिपतिः। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्॥) सिंहः। इति शब्दरत्नावली॥ (यथा, रघुवंशे।६।३।
"शिलाविभङ्गैर्मृगराजशाव-
स्तुङ्गं नगोत्सङ्गमिवारुरोह॥"
व्याघ्रः। यथा, महाभारते।१।१४१।३४।
"शृणु मे त्वं महाबाहो! यद्वाक्यं मूषिकोऽब्रवीत्। धिग्बलं मृगराजस्य मयाद्यायं मृगो हतः।")

मृगराट्, [ज्] पुं, (राजते दीप्यतेऽसौ राज्+क्विप्। ततः मृगाणां राट्।) सिंहः। इति शब्दरत्नावली॥ (यथा, शिशुपालवधे।६।१८।
"पतिते पतङ्गमृगराजि निज-
प्रतिबिम्बरोषित इवाम्बुनिधौ।")

मृगराटिका, स्त्री, (मृग+रट्+ण्वुल्+स्त्रियां टाप् अत इत्वञ्च।) जीवन्ती। इति राजनिर्घण्टः॥

मृगरिपुः, पुं, (मृगाणां रिपुः।) सिंहः। इति हलायुधः॥

मृगरोमजं, त्रि, (मृगाणां रोमभ्यो जायते इति। जन्+डः।) पशुलोमजातवस्त्रादि। तत्पर्य्यायः। राङ्कवम् २। इत्यमरः।२।६।१११॥

मृगलाञ्छनः, पुं, (मृगः लाञ्छनं चिह्नमस्य।) चन्द्रः। इति शब्दरत्नावली॥

मृगवल्लभः, पुं, (मृगाणां वल्लभः प्रियः।) कुन्दरुतृणम्। इति राजनिर्घण्टः॥

मृगवाहनः, पुं, (मृगो वाहनमस्येति।) वायुः। इति जटाधरः॥

मृगव्यं, क्ली, (मृगान् विध्यति अत्र इति। व्यध्+"अन्येष्वपि दृश्यते।" ३।२।४८। इति काशिकोक्त्या अधिकरणे डः।) मृगया। इत्यमरः।२।१०।२३॥ (यथा, मार्कण्डेये।१२७।१।
"कदाचिद्राजपुत्त्रोऽसौ मृगव्यमचरद्वने।")

मृगशिरः, [स्] क्ली, (मृगस्येव शिरोऽस्य।) सप्तविंशतिनक्षत्रान्तर्गतपञ्चमनक्षत्रम्। तत्पर्य्यायः। मृगशीर्षम् २ आग्रहायणी ३। इत्यमरः।१।३।२३॥ (यथा, वृहत्संहितायाम्।१०।५।
"मृगशिरसि वतृसयाजक-
यजमानार्य्यजनमध्यदेशाश्च।")
तत्तु विड़ालपदाकृति ताराचयात्मकं चन्द्राधिदैवतम्। इति ज्योतिषम्॥ गगनमध्ये तस्योदये कन्यालग्नस्य द्वात्रिंशत्पलानि गतानि भवन्ति। यथा,—
"मूषिकाशनपदाकृतौ विधौ
व्योममध्यमिलिते त्रितारके।
शारदेन्दुमुखि! कन्यकोदया-
दीघ्रयानलकलाः कलावति!॥"
इति कालिदासकृतरात्रिलग्ननिरूपणम्॥
तत्र जातफलम्। यथा,—
"शरासनाभ्यासरतो विनीतः
सदानुरक्तो गुणिनां गुणेषु।
भक्तानुपक्तिहरेण पूर्णः
सन्मार्गवर्त्ती मृगजन्मभागी॥"
इति कोष्ठीप्रदीपः॥

मृगशिरा, स्त्री, (सर्व्वे सान्ता अकारान्ताश्चेति मृगशिरोऽदन्तः। मृगशिर+टाप्।) मृगशिरोनक्षत्रम्। इति शब्दरत्नावली॥

मृगशिराः, [स्] पुं, (मृगस्येव शिरो यस्य।) मृगशिरोनक्षत्रम्। इत्यमरटीकायां रायमुकुटः॥

मृगशीर्षं, क्ली, (मृगस्य शीर्षमिव शीर्षमस्य।) मृगशिरोनक्षत्रम्। इत्यमरः॥ (यथा, भागवते।५।२३।६।
"तथैव मृगशीर्षादीन्युदगयनानि।")

मृगशीर्षः, पुं, (मृगस्येव शिर्षोऽस्य।) मृगशिरोनक्षत्रम्। इति केचित्॥ इत्यमरटीकायां भरतः॥

मृगशीर्षा, स्त्री, (मृगशीर्ष+टाप्।) मृगशिरोनक्षत्रम्। इति त्रिकाण्डशेषाजितः। इत्यमरटीकायां भरतः॥ (यथा, वृहत्संहितायाम्।२१।६।
"मृगशीर्षाद्या गर्भा मन्दफलाः पौषशुक्ल-
जाताश्च।")

मृगशीर्षा, [न्] पुं, (शीर्षस्य शीर्षन् इत्यादेशः। ततो मृगस्येव शीर्षास्य।) मृगशिरोनक्षत्रम्। इति केचित्॥ इत्यमरटीकायां भरतः॥

मृगा, स्त्री, (मृगः मृगमांसतुल्यः रसोऽस्ति अस्याः अर्श आदिभ्योऽच्।) सहदेवीलता। इति राजनिर्घण्टः॥

मृगाक्षी, स्त्री, (मृगस्येव अक्षि तद्वत्पुष्पं अक्षिणी वा अस्याः। अक्षि+"बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति षच्। स्त्रियां ङीष्।) विशाला॥ (यथास्याः पर्य्यायः।
"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी। वारुणी चामरापुष्पा सा विशाला महाफला। श्वेतपुष्पा मृगाक्षी च मृगेर्व्वारुर्मृगादनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मृगलोचनतुल्यनेत्रा स्त्री। इति मेदिनी। षे, ४४॥ (यथा, छन्दोमञ्जर्य्याम्।२।१९।८।
"वल्लववेशा सुररिपुनारी-
र्गोपमृगाक्षीललितरतिपूर्त्तिः।
वाञ्छितसिद्ध्यै प्रणतिपरस्य
स्यादशुकृता जगति न कस्य॥")

मृगाङ्कः, पुं, (मृगः अङ्को यस्य।) चन्द्रः॥ (यथा, नैषधचरिते।१।७८।
"विनिद्रपत्त्रालिगतालिकैतवात्
मृगाङ्कचूड़ामणिवर्ज्जनार्ज्जितम्।")
कर्पूरः। इत्यमरः।१।३।१४॥ वायुः। इति विश्वः॥ मृगचिह्नम्। चन्द्रे तच्चिह्नकारणं यथा,—
"लोकच्छायामयं लक्ष्म तवाङ्के शशसंस्थितम्। न विदुः सोमदेवापि ये च नक्षत्रयोगिनः॥"
इति महाभारते हरिवंशः॥
यथा, दर्पणं प्राप्य पराहृत्ता नयनरश्मयो ग्रीवास्थमेव मुखं दर्पणगतमिव पश्यन्ति एवं चन्द्रमण्डलं प्राप्य पराहृत्तास्ते दूरत्वदोषात् पृथिवीमव्यक्तरूपामिव चन्द्रमण्डलगतां पश्यन्ति स एव चन्द्रे कलङ्क इत्युपचर्य्यते। इति तट्टीका॥ यक्ष्मरोगस्य औषधविशेषः। यथा,
"सूतस्तेन समं हेम मौक्तिकं द्विगुणं भवेत्।
गन्धकस्तु समस्तेन रसपादस्तु टङ्कणः॥
सर्व्वं तद्गोलकं कृत्वा काञ्जिकेन विशोषयेत्।
भाण्डे लवणपूर्णेऽथ पचेद् यामचतुष्टयम्।
मृगाङ्कसंज्ञको ज्ञेयो रोगराजनिकृन्तनः॥"
अपि च।
'रसस्य भस्मनो हेम पिष्टीकृत्य प्रयोजयेत्।
गुञ्जाचतुष्टयञ्चाज्यमरिचैर्भक्षयेन्नरः॥'
इति मधुमती॥
(एतन्नामकौषधान्तरं यथा,—
"रसभस्म हेमभस्म तुल्यं गुञ्जाद्वयं द्वयम्।
दीर्घं वुद्घानुपानेन मृगाङ्कोऽयं क्षयापहः॥"*॥
इति वैद्यकरसेन्द्रसारसंग्रहे यक्ष्माधिकारे॥)

मृगाजीवः, पुं, (मृगैः आजीवतीति। जीव्+अच्।) व्याधः। इत्यमरः।२।१०।२१॥

मृगाण्डजा, स्त्री, (मृगाण्डात् जायते इति। जन्+डः+स्त्रियां टाप्।) कस्तूरी। इति राजनिर्घण्टः॥ (तथास्या विषयः।
"एतैः समस्तैरिह पलप्रमाणै-
रालोड्य सर्व्वं विधिना विपक्वम्।
कर्पूरकाश्मीरमृगाण्डजानां
चूर्णीकृतानां त्रिपलप्रमाणम्॥"
इति भैषज्यरत्नावल्यां वातरोगे मध्यमनारायणतैले॥)

मृगाद्, [द्] पुं, स्त्री, (मृगान् अत्तीति। अद्+क्विप्।) व्याघ्रः। इति केचित्॥

मृगादनः, पुं, (अत्तीति। अद्+ल्युः। मृगस्य अदनः।) क्षुद्रव्याघ्रः। तत्पर्य्यायः। तरक्षुः २। इत्यमरः।२।५।१॥ तर्क्षुः ३ तरच्छुः ४ तरक्षकः ५। इति शब्दरत्नावली॥ वृहत्कुक्कुराकारे कृष्णरेखाचित्रे नेकड़ा इति ख्याते। इति भरतः॥ चीता इति ख्याते। इत्यच्युतः॥

मृगादनी, स्त्री, (मृगैरद्यते भुज्यतेऽसौ इति॥ अद्+कर्म्मणि ल्युट्+स्त्रियां ङीष्।) इन्द्रवारुणी। सहदेवी। मृगेर्व्वारुः। इति राजनिर्घण्टः॥ (यथा,—
"शिरीषश्च महातिक्ता जरातुम्बी मृगादनी।"
इति गोविन्ददासकृतभैषज्यरत्नावल्याम् कुष्ठचिकित्सायाम्।) क्षुद्रव्याघ्री च॥

मृगान्तकः, पुं, (मृगाणां अन्तकः नाशकः।) चित्रव्याघ्रः। इति राजनिर्घण्टः॥

मृगारातिः, पुं, (मृगाणां अरातिः।) कुक्कुरः। इति शब्दमाला॥ मृगप्रभुः। यथा,—
"मार्गं मार्गं मृगयति मृगारातिरामे विरामे
शोकं शोकं गतवति गते लक्ष्मणे लक्ष्मणेन।"
इति महानाटकम्॥